कृष्णाजिने तिलान् कृत्वा काञ्चनं कारयेद्बुधः ।
समाङ्गं चतुरङ्गं वा चतुश्चक्रं सकूवरम् ।
ऐन्द्रनीलेन कुम्भेन ध्वजरूपेण संयुतम् ।
लोकपालाष्टकोपेतं पद्मरागदलान्वितम् ॥
चतुरः पूर्णकलसान् धान्यान्यष्टादशैव तु ।
कौषेयवस्त्रसंयुक्तमुपरिष्टाद्वितानकम् ॥
माल्येक्षुफलसंयुक्तं पुरुषेण समन्वितम् ।
यो यद्भक्तः पुनः कुर्य्यात् स तन्नाम्नाधिवासनम् ॥
छत्रचामरकौषेयवस्त्रोपानहपादुकाः ।
गोभिर्व्विभवतः सार्द्धं दद्याच्च शयनादिकम् ॥
अभावात् त्रिपलादूर्द्ध्वं शक्तितः कारयेच्छुभम् ॥
अश्वाष्टकेन संयुक्तं चतुर्भिरथ वाजिभिः ।
द्वाभ्यामथ युतं दद्यादिमं मन्त्रमुदीरयेत् ॥
नमो नमः पापविनाशनाय
विश्वात्मने वेदतुरङ्गमाय ।
धाम्नामधीशाय भवाभवाय
पापौघदावानल देहि शान्तिम् ॥
वस्वष्टकादित्यमरुद्गणानां
त्वमेव धाता परमं विधानम् ।
यतस्ततो मे हृदयं प्रयातु
धर्म्मैकतानं त्वमघौघनाशात् ॥
इति तुरगरथप्रदानमेतत्
भवभयसूदनमत्र यः करोति ।
स कलुषपटलैर्व्विमुक्तदेहः
परममुपैति पदं पिनाकपाणेः ॥
देदीप्यमानवपुषा विजितप्रभाव-
माक्रम्य मण्डलमखण्डलचण्डभानोः ।
सिद्धाङ्गनानयनषट्पदपीयमान-
वक्त्राम्बुजोऽम्बुजभवेन चिरं सहास्ते ॥
इति पठति शृणोति वा य इत्थं
कनकरथतुरगप्रदानमस्मिन् ।
न स नरकपुरं व्रजेत् कदाचित्
नरकरिपोर्भवनं प्रयाति भूप ! ॥”
इति मात्स्ये हिरण्याश्वरथप्रदानिको नाम २५५ अध्यायः ॥

हिरुक्, व्य, विनार्थः । मध्यार्थः । सामीप्यार्थः । इत्यमरभरतौ ॥ अधमार्थः । इति शब्दरत्नावली ॥

हिल, श भावकृतौ । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-अक०-सेट् ।) एकोऽर्थः । श, हिलति तरुण्या तरुणः । इति दुर्गादासः ॥

हिलमोचिः, स्त्री, हिलमोचिका । इति शब्दरत्नावली ॥

हिलमोचिका, स्त्री, शाकविशेषः । इत्यमरः । २ । ४ । १५७ ॥ हिंचा इति हिलञ्चा इति च वङ्गभाषा । हरहुच् इति हिन्दीभाषा । तत्पर्य्यायः । हिलमोचिः २ हिलमोची ३ रोदी ४ । इति शब्दरत्नावली ॥ मन्वी ५ विपघ्नी ६ मत्स्याक्षी ७ चक्राङ्गी ८ । इति रत्नमाला ॥ शाखोट शड्खरा १० आचारी ११ । तस्या गुणाः । यथा, भावप्रकाशे ।
“शोथं कुष्ठं कफं पित्तं हरते हिलमोचिका ॥”
अपि च ।
“हिलमोची सरा तिक्ता कुष्ठघ्नी कफवातजित् ॥”
श्लेष्मपित्तजित् इति वा पाठः । इति राजवल्लभः ॥

हिलमोची, स्त्री, (हिलमोचि+कृदिकारादिति ङीष् ।) हिलमोचिका । इति शब्दरत्नावली ॥ (तथास्या गुणाः ।
“हिलमोची सरा तिक्ता कुष्ठघ्नी कफपित्तजित् ॥”
इति वैद्यकराजवल्लभे चतुर्थपरिच्छेदे ॥)

हिसः, पुं, शरारिपक्षी । इति शब्दचन्द्रिका ॥

हिल्लोल, त् क दोलने । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-अक०-सेट् ।) अन्तःस्थतृतीयद्वयमध्यस्थदेकोपधधायम् । अजिहिल्लोलद्वायुर्लताम् । इति दुर्गादासः ॥

हिल्लोलः, पुं, (हिल्लोलयति दोलयतीति । हिल्लोलत् क दोलने+अच् ।) तरङ्गः । ढेउ इति भाषा । यथा,—
“श्लाघ्यं नीरसकाष्ठताड़नशतं श्लाघ्यः प्रचण्डातपः
क्लेशः श्लाघ्यतरः सुपङ्कनिचयः श्लाघ्योऽतिदाहानलः ।
यत्कान्ताकुचकुम्भबाहुलतिकाहिल्लोललीलासुखं
लब्धं कुम्भवर ! त्वया न हि सुखं दुःखैर्व्विना लभ्यते ॥”
इति कालिदासकृतशृङ्गारतिलकः ॥ * ॥
रतिबन्धविशेषः । स च षोड़शबन्धान्तर्गताष्टमबन्धः । तस्य लक्षणं यथा,—
‘हृदि कृत्वा स्त्रियाः पादौ कराभ्यां धारयेत्करौ ।
यथेष्टं ताड़येद्योनिं बन्धो हिल्लोलसंज्ञकः ॥”
इति रतिमञ्जरी ॥

हिल्वला, स्त्री, मृगशिरोनक्षत्रशिरोदेशस्थाः पञ्च स्वल्पातारकाः । यथा,—
“मृगशीर्षशिरोदेशे तारका या वसन्ति हि ।
हिल्वला इल्वकास्ताः स्युरिल्वला इति कुत्रचित् ॥”
इति शब्दरत्नावली ॥

हिव, इ प्रीतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, हिन्व्यते । प्रीतिरिह प्रीतिकरणम् । हिन्वति लोकः पितरम् । इति दुर्गादासः ॥

हिवुकं, क्ली, एकस्माल्लग्नाच्चतुर्थलग्नम् । तत्पर्य्यायः ।
“पातालं हिवुकञ्चैव सुहृद्भवचतुर्थकम् ।”
अपि च ।
“सपापात् भार्गवात् पापो हिवुके मातृनाशकृत् ॥”
इति ज्योतिस्तत्त्वम् ॥

हिस, इ भ कि हिंसे । इति कविकल्पद्रुमः ॥ (रुधा०-चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) इ, हिंस्यते । भ, हिनस्ति । कि, हिंसयति हिंसति । इत्यर्थेनैव पाक्षिकचुरादित्वे सिद्धे क्तिकरणं भ्वादित्वार्थनम् । इति दुर्गादासः ॥

हिहि, व्य, आह्लादजनकानुकरणशब्दः । इति केचित् ॥ दीर्घान्तद्वयमिति साधुपाठः ॥

ही, व्य, विस्मयः । इत्यमरः । ३ । ४ । ८ ॥ दुःखम् । हेतुः । विषादः । इति मेदिनी ॥ शोकः । इति शब्दरत्नावली ॥ (यथा, वक्रोक्तिपञ्चाशिकायाम् । ३१ ।
“ही नाहं भवतोऽतिवक्रवचसा दातुं प्रवीणोत्तरं
का ते सुन्दरि ! हीनता ननु नता सर्व्वा त्रिलोकीव ते ॥”)

हीनः, त्रि, (ओ हा क लि त्यागे+क्तः । “ओदितश्च ।” ८ । २ । ४५ । इति नत्वम् । “घुमास्थागापाजहातीति ।” ६ । ४ । ६६ । इति ईत्वम् ।) ऊनः । (यथा, रघुः । १ । ७० ।
“तया हीनं विधातर्म्मां कथं पश्यन्न दूयसे ।
सिक्तं स्वयमिव स्नेहाद् बन्ध्यमाश्रमपादपम् ॥”)
गर्ह्यः । इत्यमरः । ३ । ३ । १२७ ॥ अधमः । इति जटाधरः ॥ (यथा, मनौ । ३ । १०७ ।
“आसनावसथौ शय्यामनुव्रज्यामुपासनम् ।
उत्तमेषूत्तमं कुर्य्यात् हीने हीनं समे समम् ॥”)
प्रतिवादिविशेषः । स च पञ्चविधः । यथा, नारदः ।
“अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः ॥”
इति व्यवहारतत्त्वम् ॥

हीनजातिः, त्रि, (हीना जातिर्यस्य ।) नीचवर्णः । इति केचित् ॥ (यथा, मनुः । ३ । १५ ।
“हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः ।
कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम् ॥”)

हीनवर्णः, त्रि, (हीनो वर्णो यस्य ।) नीचजातिः यथा,—
“हीनवर्णोपभुक्ता या त्याज्या वध्यापि वा भवेत् ।”
इति प्रायश्चित्ततत्त्वम् ॥

हीनवादी, [न्] त्रि, (हीनं वदतीति । वद+णिनिः ।) वाक्यवर्जितः । बोवा इति भाषा । तत्पर्य्यायः । अधरः २ । इति हेमचन्द्रः ॥ विरुद्धार्थवादी । यथा, नारदः ।
‘पूर्व्ववादं परित्यज्य योऽन्यमालम्बते पुनः ।
वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः ॥”
इति ।
हीनवादी दण्ड्यो भवति न प्रकृतादर्थाद्धीयते । इति च मिताक्षरा ॥

हीनसख्यं, क्ली, (हीनेन सह सख्यम् ।) नीचेन सह मित्रता । इति केचित् ॥

हीनाङ्गः, त्रि, (हीनमङ्गं यस्य ।) स्वभावतो न्यूनावयवविशिष्टः । तत्पर्य्यायः । पोगण्डः २ विकलाङ्गकः ३ व्यङ्गः ४ अपाङ्गः ५ अपोगण्डः ६ । इति जटाधरः । तेन सह परीहासनिषेधो यथा,—
“जातिहीनं वित्तहीनं रूपहीनमदक्षिणम् ।
हीनाङ्गमतिरिक्ताङ्गं तेन दोषेण नाक्षिपेत् ॥